# Tripura Bharati Laghustavah

# ત્રિપુરા ભારતી લઘુસ્તવઃ

## Document Information

Text title : Tripura Bharati Laghustavah

File name : tripurAbhAratIlaghustavaH.itx

Category : devii

Location : doc_devii

Author : somatilakasUri

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Latest update : June 24, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2020

*sanskritdocuments.org*

# ત્રિપુરા ભારતી લઘુસ્તવઃ

॥ ૐ નમઃ ત્રિપુરાયૈ ॥

ઐન્દ્રસ્યેવ શરાસનસ્ય દધતી મધ્યે લલાટં પ્રભાં
શૌક્લીં કાન્તિમનુષ્ણગોરિવ શિરસ્યાતન્વતી સર્વતઃ ।
એષાઽસૌ ત્રિપુરા હૃદિ દ્યુતિરિવોષ્ણાંશોઃ સદાહઃસ્થિતા
છિન્દ્યાન્નઃ સહસા પદૈસ્ત્રિભિરઘં જ્યોતિર્મયી વાઙ્મયી ॥ ૧॥

યા માત્રા ત્રપુસીલતાતનુલસત્તન્તૂત્થિતિસ્પર્દ્ધિની
વાગ્બીજે પ્રથમે સ્થિતા તવ સદા તાં મન્મહે તે વયમ્ ।
શક્તિઃ કુણ્ડલિનીતિ વિશ્વજનનવ્યાપારબદ્ધોદ્યમા
જ્ઞાત્વેત્થં ન પુનઃ સ્પૃશન્તિ જનનીગર્ભેઽર્ભકત્વં નરાઃ ॥ ૨॥

દૃષ્ટ્વા સમ્ભ્રમકારિ વસ્તુ સહસા ઐ ઐ ઇતિ વ્યાહૃતં
યેનાકૂતવશાદપીહ વરદે ! બિન્દું વિનાઽપ્યક્ષરમ્ ।
તસ્યાપિ ધ્રુવમેવ દેવિ ! તરસા જાતે તવાઽનુગ્રહે
વાચઃ સૂક્તિસુધારસદ્રવમુચો નિર્યાન્તિ વક્ત્રામ્બુજાત્ ॥ ૩॥

યન્નિત્યે તવ કામરાજમપરં મન્ત્રાક્ષરં નિષ્કલં
તત્ સારસ્વતમિત્યવૈતિ વિરલઃ કશ્ચિદ્ બુધશ્ચેદ્ ભુવિ ।
આખ્યાનં પ્રતિપર્વ સત્યતપસો યત્કીર્તયન્તો દ્વિજાઃ
પ્રારમ્ભે પ્રણવાસ્પદં પ્રણયિતાં નીત્વોચ્ચરન્તિ સ્ફુટમ્ ॥ ૪॥

યત્સદ્યો વચસાં પ્રવૃત્તિકરણે દૃષ્ટપ્રભાવં બુધૈ-
સ્તાર્તીયીકમહં નમામિ મનસા તદ્બીજમિન્દુપ્રભમ્ ।
અસ્ત્વૌર્વોઽપિ સરસ્વતીમનુગતો જાડ્યામ્બુવિચ્છિત્તયે
ગૌઃશબ્દો ગિરિ વર્તતે સ નિયતં યોગં વિના સિદ્ધિદઃ ॥ ૫॥

એકૈકં તવ દેવિ ! બીજમનઘં સવ્યઞ્જનાવ્યઞ્જનં
કૂટસ્થં યદિ વા પૃથક્ક્રમગતં યદ્વા સ્થિતં વ્યુત્ક્રમાત્ ।

યં યં કામમપેક્ષ્ય યેન વિધિના કેનાપિ વા ચિન્તિતં
    જપ્તં વા સફલીકરોતિ તરસા તં તં સમસ્તં નૃણામ્ ॥ ૬॥

વામે પુસ્તકધારિણીમભયદાં સાક્ષસ્રજં દક્ષિણે
    ભક્તેભ્યો વરદાનપેશલકરાં કર્પૂરકુન્દોજ્જ્વલામ્ ।
ઉજ્જૃમ્ભામ્બુજપત્રકાન્તનયનસ્નિગ્ધપ્રભાલોકિનીં
    યે ત્વામમ્બ ! ન શીલયન્તિ મનસા તેષાં કવિત્વં કુતઃ ॥ ૭॥

યે ત્વાં પાણ્ડુરપુણ્ડરીકપટલસ્પષ્ટાભિરામપ્રભાં
    સિઞ્ચન્તીમમૃતદ્રવૈરિવ શિરો ધ્યાયન્તિ મૂર્ધ્નિ સ્થિતામ્ ।
અશ્રાન્તં વિકટસ્ફુટાક્ષરપદા નિર્યાતિ વક્ત્રામ્બુજાત્
    તેષાં ભારતિ ભારતી સુરસરિત્કલ્લોલલોલોર્મિભિઃ ॥ ૮॥

યે સિન્દૂરપરાગપુઞ્જપિહિતાં ત્વત્તેજસા દ્યામિમા-
    મુર્વીં ચાપિ વિલીનયાવકરસપ્રસ્તારમગ્નામિવ ।
પશ્યન્તિ ક્ષણમપ્યનન્યમનસસ્તેષામનઙ્ગજ્વર-
    ક્લાન્તાસ્ત્રસ્તકુરઙ્ગશાવકદૃશો વશ્યા ભવન્તિ સ્ત્રિયઃ ॥ ૯॥

ચઞ્ચત્કાઞ્ચનકુણ્ડલાઙ્ગદધરામાબદ્ધકાઞ્ચીસ્રજં
    યે ત્વાં ચેતસિ તદ્ગતે ક્ષણમપિ ધ્યાયન્તિ કૃત્વા સ્થિરમ્ ।
તેષાં વેશ્મનિ વિભ્રમાદહરહઃ સ્ફારી ભવન્ત્યશ્ચિરાદ્
    માદ્યત્કુઞ્જરકર્ણતાલતરલાઃ સ્થૈર્યં ભજન્તે શ્રિયઃ ॥ ૧૦॥

આર્ભટ્યા શશિખણ્ડમણ્ડિતજટાજૂટાં નૃમુણ્ડસ્રજં
    બન્ધૂકપ્રસવારુણામ્બરધરાં પ્રેતાસનાધ્યાસિનીમ્ ।
ત્વાં ધ્યાયન્તિ ચતુર્ભુજાં ત્રિનયનામાપીનતુઙ્ગસ્તનીં
    મધ્યે નિમ્નવલિત્રયાઙ્કિતતનું ત્વદ્રૂપસમ્પત્તયે ॥ ૧૧॥

જાતોઽપ્યલ્પપરિચ્છદે ક્ષિતિભૃતાં સામાન્યમાત્રે કુલે
    નિઃશેષાવનિચક્રવર્તિપદવીં લબ્ધ્વા પ્રતાપોન્નતઃ ।
યદ્વિદ્યાધરવૃન્દવન્દિતપદઃ શ્રીવત્સરાજોઽભવદ્
    દેવિ! ત્વચ્ચરણામ્બુજપ્રણતિજઃ સોઽયં પ્રસાદોદયઃ ॥ ૧૨॥

ચણ્ડિ ! ત્વચ્ચરણામ્બુજાર્ચનકૃતે બિલ્વીદલોલ્લુણ્ટન-
    ત્રુટ્યત્કણ્ટકકોટિભિઃ પરિચયં યેષાં ન જગ્મુઃ કરાઃ ।
તે દણ્ડાઙ્કુશચક્રચાપકુલિશશ્રીવત્સમત્સ્યાઙ્કિતૈ-
    ર્જાયન્તેપૃથિવીભુજઃ કથમિવામ્ભોજપ્રભૈઃ પાણિભિઃ ॥ ૧૩॥

વિપ્રાઃ ક્ષોણિભુજો વિશસ્તદિતરે ક્ષીરાજ્યમધ્વૈક્ષવૈ
સ્ત્વાં દેવિ ! ત્રિપુરે ! પરાપરકલાં સન્તર્પ્ય પૂજાવિધૌ ।
યાં યાં પ્રાર્થયતે મનઃ સ્થિરધિયાં તેષાં ત એવ ધ્રુવં
તાં તાં સિદ્ધિમવાપ્નુવન્તિ તરસા વિઘ્નૈરવિઘ્નીકૃતા ॥ ૧૪॥

શબ્દાનાં જનની ત્વમત્ર ભુવને વાગ્વાદિનીત્યુચ્યસે
ત્વત્તઃ કેશવવાસવપ્રભૃતયોઽપ્યાવિર્ભવન્તિ ધ્રુવમ્ ।
લીયન્તે ખલુ યત્ર કલ્પવિરતૌ બ્રહ્માદયસ્તેઽપ્યમી
સા ત્વં કાચિદચિન્ત્યરૂપમહિમા શક્તિઃ પરા ગીયસે ॥ ૧૫॥

દેવાનાં ત્રિતયં ત્રયી હુતભુજાં શક્તિત્રયં ત્રિસ્વરા
સ્ત્રૈલોક્યં ત્રિપદી ત્રિપુષ્કરમથ ત્રિબ્રહ્મ વર્ણાસ્ત્રયઃ ।
યત્કિઞ્ચિજ્જગતિ ત્રિધા નિયમિતં વસ્તુ ત્રિવર્ગાદિકં
તત્સર્વં ત્રિપુરેતિ નામ ભગવત્યન્વેતિ તે તત્ત્વતઃ ॥ ૧૬॥

લક્ષ્મીં રાજકુલે જયાં રણમુખે ક્ષેમઙ્કરીમધ્વનિ
ક્રવ્યાદદ્વિપસર્પભાજિ શબરીં કાન્તારદુર્ગે ગિરૌ ।
ભૂતપ્રેતપિશાચજૃમ્ભકભયે સ્મૃત્વા મહાભૈરવીં
વ્યામોહે ત્રિપુરાં તરન્તિ વિપદસ્તારાં ચ તોયપ્લવે ॥ ૧૭॥

માયા કુણ્ડલિની ક્રિયા મધુમતી કાલી કલામાલિની
માતઙ્ગી વિજયા જયા ભગવતી દેવી શિવા શામ્ભવી ।
શક્તિઃ શઙ્કરવલ્લભા ત્રિનયના વાગ્વાદિની ભૈરવી
હ્રીઙ્કારી ત્રિપુરા પરાપરમયી માતા કુમારીત્યસિ ॥ ૧૮॥

આ ઈ પલ્લવિતૈઃ પરસ્પરયુતૈર્દ્વિ-ત્રિક્રમાદ્યક્ષરૈઃ
કાદ્યૈઃ ક્ષાન્તગતૈઃ સ્વરાદિભિરથ ક્ષાન્તૈશ્ચ તૈઃ સસ્વરૈઃ ।
નામાનિ ત્રિપુરે! ભવન્તિ ખલુ યાન્યત્યન્તગુહ્યાનિ તે
તેભ્યો ભૈરવપત્નિ વિંશતિસહસ્રેભ્યઃ પરેભ્યો નમઃ ॥ ૧૯॥

બોદ્ધવ્યા નિપુણં બુધૈસ્તુતિરિયં કૃત્વા મનસ્તદ્ગતં
ભારત્યાસ્ત્રિપુરેત્યનન્યમનસો યત્રાદ્યવૃત્તે સ્ફુટમ્ ।
એક-દ્વિ-ત્રિપદક્રમેણ કથિતસ્તત્પાદસઙ્ખ્યાક્ષરૈ-
ર્મન્ત્રોદ્ધારવિધિર્વિશેષસહિતઃ સત્સંપ્રદાયાન્વિતઃ ॥ ૨૦॥

સાવદ્યં નિરવદ્યમસ્તુ યદિ વા કિંવાઽનયા ચિન્તયા

નૂનં સ્તોત્રમિદં પઠિષ્યતિ જનો યસ્યાસ્તિ ભક્તિસ્ત્વયિ ।
સઞ્ચિન્ત્યાપિ લઘુત્વમાત્મનિ દૃઢં સઞ્જાયમાનં હઠાત્
ત્વદ્ભક્ત્યા મુખરીકૃતેન રચિતં યસ્માન્મયાપિ ધ્રુવમ્ ॥ ૨૧॥

ઇતિ શ્રીસોમતિલકસૂરિવિરચિતઃ શ્રીત્રિપુરા ભારતી લઘુસ્તવઃ સમાપ્તઃ ।

Encoded and proofread by Aruna Narayanan

*Tripura Bharati Laghustavah*
pdf was typeset on June 24, 2020

Please send corrections to *sanskrit@cheerful.com*